# शिशुगीतम्

डा. विश्वासः

पुत्री मम खलु निद्राति
पुत्री मम खलु निद्राति ।
सुन्दरशयने सुखमयवसने
पुत्री मम खलु निद्राति ।।

रे रे वायस कर्कशकण्ठ !
मा रट मा रट कर्णकठोरम् ।
श्रान्ता क्लान्ता पुनरनुनीता
पुत्री मम खलु निद्राति ।।

माँव्, माँव्, मा कुरु घोरविरवं
चल चल रे खल चोरबिडाल !
स्निग्धा मुग्धा सेवितदुग्धा
पुत्री मम खलु निद्राति ।।

उच्चैर्मा भष शुनक! वराक!
भौ भौ मा कुरु कार्यविहीन! ।
विमला कुशला सुमनोमृदुला
पुत्री मम खलु निद्राति ।।

रे रे मशक ! मा कुरु गानं
मा स्पृश मा दश रक्तपिपासो !
सुदती सुमुखी शोभनगात्री
पुत्री मम खलु निद्राति ।।

**पुत्री, वायस, श्रान्ता, क्लान्ता, विरवम्, चोरविडालः, स्निग्धा, मुग्धा, शुनकः, वराकः**

# टिप्पणी

**शब्दार्थ: -**

भष - बुक्क (ଭୁକ), वायस: - काक: (କାଉ), विरवम् - शब्द: (ବିକଟ ଶବ୍ଦ), शयने- शय्यायाम् (ଶେଯରେ), अनुनीता - विनीता (ବିନମ୍ର), मुग्धा - सरला (ସରଳ), वराक: - हतभाग्य: (ହତଭାଗା), सुदती - शोभनदन्तयुक्ता (ଭଲ ଦାନ୍ତ ଥିବା) ।

## अभ्यास :

१. **गीतमिदं सस्वरं गायत ।**

२. **शून्यस्थानं पूरयत ।**

(क) सुन्दरशयने ________________ ।

(ख) ________________ कर्कशकण्ठ !

(ग) श्रान्ता क्लान्ता ________________ ।

(घ) चल चल रे ________________ चोरविडाल ।

(ङ) भौ भौ मा कुरु ________________ ।

(च) ________________ सुमनो मृदुला ।

(छ) मा स्पृश मा दश ________________ ।

३. **स्तम्भमेलनं कुरुत ।**

| **'क'** | **'ख'** |
|---|---|
| पुत्री मम खलु | शुनक वराक! |
| रे रे मशक ! | पुनरनुनीता |
| स्निग्धा मुग्धा | निद्राति |
| सुदति सुमुखी | सेवितदुग्धा |
| उच्चैर्मा भष | मा कुरु गानम् |
| श्रान्ता क्लान्ता | शोभनगात्री |

४. **पद्यानुसारं सज्जीकुरुत ।**

(क) निद्राति खलु मम पुत्री । ____________________

(ख) कर्कशकण्ठ ! वायस !! रे रे । ____________________

(ग) श्रान्ता पुनरनुनीता क्लान्ता । ____________________

(घ) खल चल चल रे चोरबिडाल । ____________________

(ङ) सेवितदुग्धा मुग्धा स्निग्धा । ____________________

(च) सुमनोमृदुला कुशला विमला । ____________________

(छ) मशक ! रे रे गानं मा कुरु । ____________________

५. **उचितेन पदेन शून्यस्थानं पूरयत ।**

(क) पुत्री मम खलु ____________ । (निद्रामि, निद्रासि, निद्राति)

(ख) उच्चैर्मा ____________ शुनक वराक! । (भष, भषेयुः, भषथ)

(ग) रे रे मशक ! मा ____________ गानम् । (करोमि, कुरु, कुर्युः)

(घ) मा रट मा ____________ कर्णकठोरम् । (रट, रटतम्, रटत)

(ङ) मा ____________ रक्त पिपासो! । (दशत्तु, दश, दशय)

●